M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Acc. 574

Title: Nyayabodhini Tika
(Tika Sangrah 2)

574

न्यायबोधिनी टीका on तर्कसंग्रह

		Nyāyabodhini Tikā on Tarka[x]	Title
		Govardhana	Author
			Editor
			Year, Vols.
			Publisher
574		[x] Sangraha.	Remarks

१ ॥श्रीगणेशायनमः॥निखिलागमसंचारिश्रीकृष्णाख्यंपरंमहः॥नत्वागोवर्द्धनसुधी
स्तनुतेन्यायबोधिनीं॥१॥चिकीर्षितस्यग्रंथस्यनिर्विघ्नेनपरिसमाप्त्यर्थंस्वेष्ट
देवतानमस्कारात्मकंमंगलंअसंनिहितशिष्यशिक्षायैग्रंथादौनिबध्नाति॥
निधायेति॥पदार्थान्विभजते॥द्रव्येति॥सप्तग्रहणंपदार्थत्वंद्रव्यादिसप्तान्यत
मत्वव्याप्यमितिव्याप्तिलाभाय॥ननुशक्तिपदार्थस्यअष्टमस्यसत्वात्कथं
सप्तैवेति॥तथाहिमण्यादिसमवहितेधनादौसत्यपिवह्निसंयोगेदाहोनजा १

२

यते॥नजायते॥अतोमणिसमवधानेदाहानुकूलाशक्तिर्नश्यते॥मण्यभा
वदशायांदाहानुकूलाशक्तिरुत्पद्यते॥तस्माच्छक्तिरतिरिक्तःपदार्थइतिचेन्न
दाहंप्रतिमणेःप्रतिबंधकत्वेनतदभावस्यदाहकारणत्वेनैवनिर्वाहेसमवधा
नासमवधानाभ्यांअनंतशक्तिअनंतध्वंसकल्पनायाःअन्याय्यत्वात्॥तस्मा
त्सप्तैवपदार्थाःइतिसिद्धं॥पदार्थान्विभज्यद्रव्याणिविभजते॥पृथिवीति
ननुअंधकारस्यदशमद्रव्यस्यापिविद्यमानत्वात्कथंनवेति॥तथाहिनीलं

२ तमश्चलतीति प्रतीत्या नीलरूपाश्रयत्वेन च तमसः दशमद्रव्यत्वं सिद्धं ॥ न च कुत्र नव
द्रव्येषूक्तं भावसंभवात् कुतो दशमद्रव्यमिति वाच्यं ॥ आकाशादिपंचकस्य नील
रूपत्वात् ॥ वायोरपि नांतर्भावः ॥ तमसो निर्गंधत्वात् ॥ न पृथिव्यामंतर्भावः ॥
जलतेजसोः शीतोष्णस्पर्शवत्वात् न तयोरंतर्भावः ॥ तस्मात्तमो दशमद्रव्यत्वं सि
द्धं ॥ इति चेन्न ॥ तेजसो अभावेनैवोपपत्तौ अतिरिक्तद्रव्यकल्पनायाः मानाभावा २
त् ॥ न च विगिमनाविरहात् ॥ अंधकाराभावस्वरूपमस्त्वीति वाच्यम् ॥ तेजसो अ

भावस्वरूपत्वे सर्वानुभवसिद्धोष्णस्पर्शाश्रयीभूतद्रव्यांतरकल्पने गौरवात् ॥ तस्मा
त् उष्णस्पर्शगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धं ॥ तमसि नीलादि ॥ प्रतीतिस्तु भ्रांतिरेव ॥
दीपानयनापसरणक्रियाया एव तत्र भानात् ॥ गंधवत्वं पृथिव्याः लक्षणं ॥ पृथिवी लक्ष्या ॥
पृथिवीत्वं लक्षणतावच्छेदकं ॥ यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्षणतावच्छेदकः ॥ यो धर्मो य
स्यामवच्छेदकः सा तद्धर्मावच्छिन्ना ॥ तथा च लक्षणावच्छेदकं पृथिवीत्वं ॥ लक्षणता पृथिवी
त्वावच्छिन्ना ॥ एवं शीतस्पर्शत्वादिलक्षणेषु जलादीनां लक्षणा जलत्वादीनां लक्षणतावच्छे

दकत्वं बोध्यं ॥ पृथिव्यादित्रिकं निरूप्य ॥ वायुं निरूपयति ॥ रूपरहितेति ॥ रूपरहितत्वे सति
२ स्पर्शवत्त्वं वायोर्लक्षणं ॥ विशेषणांशानुपादाने स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादित्रि
केऽतिव्याप्तिः ॥ तद्वारणाय विशेषणोपादानं ॥ तावन्मात्रोपादाने आकाशादावतिव्या
प्तिः ॥ तद्वारणाय विशेष्योपादानं ॥ अतिव्याप्तिर्नाम ॥ अलक्ष्ये लक्षणसत्त्वं यथा गोः शृंगि
त्वं लक्षणं कृतं चेत् अलक्ष्यभूतगोभिन्ने महिष्यादावतिव्याप्तिः ॥ तत्रापि शृंगित्वस्य विद्य २
मानत्वात् ॥ अव्याप्तिर्नाम ॥ लक्ष्यैकदेशावृत्तित्वं यथा गोर्नीलरूपवत्त्वं लक्षणं कृतं चेत्

श्वेतगवि नीलरूपाभावात् ॥ लक्ष्यैकदेशावृत्तित्वं नाम ॥ लक्ष्यतावच्छेदकाश्रयभिन्ने
क्वचित् लक्ष्ये लक्षणासत्त्वं ॥ अव्याप्तिरित्यर्थः ॥ असंभवो नाम ॥ लक्ष्यमात्रे कुत्रापि ल
क्षणासत्त्वं ॥ यथा गोरेकशफवत्त्वं ॥ गोसामान्यस्यापि द्विशफवत्त्वेन एकशफत्वाभावात् ॥
अतिव्याप्ति अव्याप्ति असंभवानां निर्दुष्टलक्षणमुच्यते ॥ लक्ष्यतावच्छेदकावच्छिन्न
प्रतियोगिताकभेदसामानाधिकरण्यमतिव्याप्तिः ॥ अव्याप्तिस्तु लक्ष्यतावच्छेदक
सामानाधिकरण्ये सति लक्ष्यतावच्छेदकसमानाधिकरणात्यंताभावप्रतियोगित्वं ॥

४ असंभवस्तल्लक्षणतावच्छेदकव्यापकीभूताभावप्रतियोगित्वं ॥ आकाशं लक्षयति ॥ श
ब्दगुणपदं आकाशे शाब्द एव विशेषगुण इति द्योतनाय ॥ नत्वतिव्याप्तिवारणाय ॥ स
मवायेन शाब्दवत्वमात्रस्यैव सम्यक्त्वात् ॥ ननु कथं रूपं गंधो रसः स्पर्शः स्नेहः सांसि
द्धिकोद्रवः ॥ बुद्ध्यादिभावनान्ताश्चतुर्दशैव वैशेषिका गुणा इति ॥ तच्चैकमिति ॥ अनेकत्वे
मानाभावात् ॥ इति भावः ॥ विभ्वीति ॥ विभुत्वं सर्वमूर्तद्रव्यसंयोगित्वं मूर्तत्वं क्रिया ४
श्रयत्वं ॥ पृथिव्यप्तेजोवायुमनांसि मूर्तानि ॥ पृथिव्यप्तेजोवाय्वाकाशपंचकं भूत

पदवाच्यं ॥ भूतत्वं बहिरिंद्रियग्राह्यविशेषगुणवत्वं ॥ कालं लक्षयति ॥ अतीतेत्यादि ॥ व्यव
हारहेतुत्वस्य लक्षणत्वे घटोस्तीति व्यवहारहेतौ घटादावतिव्याप्तिः ॥ तद्वारणाय अतीते
ति ॥ विशेषणं देयं ॥ दिशो लक्षणमाह ॥ प्राच्यादीति ॥ उदयाचलसंनिहिता या दिक् प्राची ॥
अस्ताचलसंनिहिता या दिक् सा प्रतीची ॥ सुमेरोः संनिहिता दिक् उदीची ॥ सुमेरोः व्यवहिता
दक्षिणा ॥ आत्मानं निरूपयति ॥ ज्ञानाधिकरणमिति ॥ अधिकरणपदं समवायेन ज्ञान
लाभाय ॥ मनो निरूपयति ॥ सुखादीति ॥ उपलब्धीति साक्षात्कारः ॥ तथा च सुखा

दिक्षात्कारकारणत्वे सति इन्द्रियत्वं मनसो लक्षणं ॥ इन्द्रियत्वमात्रोक्तौ चक्षुरिन्द्रियादावतिव्या
५ प्तिः ॥ अतः पूर्वदलं विशेष्यानुपादाने आत्मन्यतिव्याप्तिः ॥ आत्मनो विज्ञानं प्रति समवायिकारण
त्वात् ॥ अतः इन्द्रियत्वविशेष्योपादानं ॥ इति द्रव्यनिरूपणं ॥ रूपं लक्षयति ॥ चक्षुर्मात्रेति ॥
चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्षणं ॥ विशेष्यमात्रोपादाने रसादावतिव्याप्तिः ॥
अतः चक्षुर्मात्रग्राह्यत्वेति ॥ तावन्मात्रोपादाने रूपत्वादावतिव्याप्तिः ॥ यो गुणो यदिन्द्रिय ५
ग्राह्यः तन्निष्ठा जातिरपि तदिन्द्रियग्राह्या ॥ अतः तद्वारणाय विशेष्योपादानं ॥ चक्षु

र्मात्रग्राह्यत्वं नाम चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं ॥ मात्रपदानुपादाने सं
ख्यादिसामान्यगुणे अतिव्याप्तिः ॥ संख्यादावपि चक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्य सत्त्वात् ॥
अतः तत्र अतिव्याप्तिवारणाय मात्रपदं ॥ संख्यादेश्च चक्षुर्भिन्नत्वगिन्द्रियग्राह्यत्वात् ॥ च
क्षुर्मात्रग्राह्यत्वं नास्ती अत्र ग्राह्यत्वं नाम लौकिकप्रत्यक्षविषयत्वं ॥ अग्राह्यत्वं नाम तद
विषयत्वं ॥ तथा च चक्षुर्भिन्नेन्द्रियजन्यसाक्षात्काराविषयत्वे सति चक्षुर्जन्यचाक्षुषप्र
ति त्यक्षविषयत्वमिति फलितोर्थः ॥ ननु प्रभाभित्तिसंयोगे रूपलक्षणस्यातिव्याप्तिः ॥

तस्य चक्षुर्मात्रग्राह्यगुणत्वादिति चेन्न ॥ गुणपदस्य विशेषगुणपरत्वात् ॥ नचैवं विशेष
६ त गुणपदेऽपि लक्षणे रसत्वादावतिव्याप्त्यभावात् मात्रपदं व्यर्थमिति वाच्यं ॥ जलमात्रवृत्ति
सांसिद्धिकद्रवत्वादावतिव्याप्तिवारणाय तदुपादानात् ॥ अथवा चक्षुर्मात्रग्राह्यजाति
मद्गुणत्वस्य लक्षणत्वात् न प्रभाभित्तिसंयोगादावतिव्याप्तिः ॥ संयोगजातेः चक्षुर्मात्र
ग्राह्यत्वाभावात् ॥ घटसंयोगस्य त्वगिन्द्रियग्राह्यत्वात् ॥ अत्र जातिघटितलक्षणेगु ६
णत्वानुपादाने चक्षुर्मात्रग्राह्यजातिमति सुवर्णादावतिव्याप्तिः ॥ तद्वारणाय तदुपा

वेन्नदृशत्ते जातेरपि त्वगिन्द्रियत्वा ॥ योगुणोपादिं द्रियग्रा

दानं ॥ एवं रसादिलक्षणे विशेषगुणानुपादाने लक्ष्यभिन्नगुणादावतिव्याप्तिः ॥ विशेषानु
पादाने लक्ष्यमात्रवृत्तिरसत्वगन्धत्वादावतिव्याप्तिः ॥ अतो विशेष्यविशेषणोभयोपादा
नं ॥ स्पर्शं लक्षयति ॥ त्वगिन्द्रियमात्रेति ॥ अत्रापि मात्रपदं संख्यादावतिव्याप्तिवारणा
य ॥ अन्यविशेषणकृत्यं पूर्ववद्बोध्यं ॥ ग्राह्यत्वपदार्थोऽपि पूर्ववत्प्रत्यक्षविषयत्वरूप एव बो
ध्यः ॥ रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च ॥ एतेन तत्त्वनिर्णयश्चेत्यं ॥ पाको नाम वि
जातीयतेजःसंयोगः ॥ स तु नानाजातीयः ॥ रूपजनको विजातीयतेजःसंयोगः ॥

७ तदपेक्षया रसजनको विजातीयः ॥ एवं प्रकारेण स्पर्शादावपि तथैव प्रकारेण भिन्नभिन्नजाती
याः पाकाः ॥ कार्यवैलक्षण्येन कल्पनीयाः ॥ यथा तृणपुंजनिक्षिप्ते अम्लाद्युष्णलक्षणवि
जातीयतेजःसंयोगेन पूर्वहरितरूपनाशेन रूपांतरस्य पीतादेरुत्पत्तिः ॥ पूर्वरसस्य
अम्लरसस्यैव अनुभवात् हरितरूपस्य सत्त्वेपि रसपरावृत्तिदर्शनेन ॥ रसविजातीयतेजःसंयो
गरूपपाकवशात् पूर्वतनाम्लरसनाशेन मधुररसस्यानुभवात् तस्मात् रूपजनकापे ७
क्षया रसजनको विलक्षण एवं गंधजनकोपि विलक्षण एव अंगीकार्यः ॥ रूपरसयोः परा
वृत्तावपि एवं गंधनाशो विजातीयपाकवशात् सुगंधोपलब्धिः ॥ एवं स्पर्शेपि पाकवशा
त् कठिनस्पर्शनाशे मृदुस्पर्शानुभवात् ॥ तस्मात् रूपादिजनकाः विजातीयाः पाकाः ॥ यथा
कार्यमनुमेयाः ॥ अत एव पार्थिवपरमाणूनामेकजातित्वेपि पाकमहिम्ना विजातीयद्रव्यांत
रानुभवः ॥ यथा गोभुक्ततृणादीनां अपरमाण्वंतरभंगेन तृणारंभकपरमाणुषु विजातीय
तेजःसंयोगात् ॥ पूर्वरूपादिचतुष्टयनाशेन तदनंतरं दुग्धस्य यादृशं रूपादिकं वर्त
ते ॥ तादृशरूपरसगंधस्पर्शजनकास्तेजःसंयोगाः ॥ जायंते तदुत्तरं तैरेव तादृश

एवं

६ रूपरसादयः उत्पद्यंते ॥ ऐतादृशरूपादिविशिष्टपरमाणुभिरेव द्व्यणुकमारभ्यते ॥ तत
स्त्र्यणुकादिक्रमेण द्रव्यारंभ इति ॥ एवं द्रव्यारंभकैः परमाणुभिरेव द्रव्यारभ्यते ॥ पाक
महिम्ना द्रव्यारंभकैरेव परमाणुभिर्नवीनमारभ्यत इति दिग् ॥ विभागं लक्षयति ॥
संयोगनाशक इति ॥ संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणं ॥ विशेषणमात्रोपादाने
क्रियायां अतिव्याप्तिः ॥ अतः गुणपदं ॥ गुरुत्वं लक्षयति ॥ आद्येति ॥ द्वितीयपतनक्रियायां ६
वेगस्यैवासमवायिकारणत्वात् अतिव्याप्तिवारणाय आद्येति ॥ उक्तलक्षणे आद्येति

विशेषणमपि पूर्ववदेव ज्ञानीयं ॥ स्नेहं लक्षयति ॥ चूर्णादीति ॥ चूर्णादिपिंडीभावहेतुत्वे स
ति गुणत्वं स्नेहस्य लक्षणं ॥ पिंडीभावो नाम चूर्णादिधारणाकर्षणहेतुभूतो विलक्षणसं
योगः ॥ तादृशसंयोगे स्नेहस्यैवासाधारणकारणत्वं ॥ ननु जलादिगतद्रवत्वस्य ॥ तथा सति
द्रुतसुवर्णादिसंयोगेन चूर्णादेः पिंडीभावापत्तेः ॥ अतः स्नेहस्यैवासाधारणकारणत्वं ॥ ग
विशेषणमात्रोपादाने कालादावतिव्याप्तिः ॥ तद्वारणाय विशेष्योपादानं ॥ वस्तुतस्तु
द्रुतजलसंयोगस्यैव पिंडीभावहेतुत्वं ॥ स्नेहस्य पिंडीभावहेतुत्वे मानाभावात् ॥ जलेद्रु

त्वविशेषणात् कटकादिव्यावृत्तिः॥ शब्दं लक्षयति॥ श्रोत्रेति॥ शब्दत्वे अतिव्याप्तिवार
१ णाय गुणपदं॥ रूपादावतिव्याप्तिवारणाय श्रोत्रेति॥ स च त्रिविधः॥ संयोगजो विभा
गजः शब्दजश्चेति॥ तथा भेरीदण्डसंयोगजन्यो भीतूकारादिशब्दः॥ हस्ताभिघातसंयो
गजन्यो मृदङ्गादिशब्दः॥ वंशे पाट्यमाने दलद्वयविभागजन्यश्चचटायमानशब्दः॥ श
ब्दसंततिदेशमारभ्य श्रोत्रदेशपर्यन्तं निमित्तपवनेन शब्दधारा जायते॥ उत्तरोत्तरशब्दे १
पूर्वपूर्वशब्दः कारणं॥ बुद्धेर्लक्षणमाह॥ सर्वव्यवहारेति॥ व्यवहारः शब्दप्रयोगः॥

अतिव्याप्तिवारणाय विशेष्योपादानं॥ ध्वंसं प्रति स्वप्रतियोगिनः कारणत्वात्॥
ज्ञानं विना शब्दप्रयोगासंभवात्॥ शब्दप्रयोगरूपव्यवहारहेतुत्वं बुद्धेर्लक्षणं॥ बुद्धिं विभ
जते॥ स्मृतिरनुभवश्चेति॥ स्मृतिं लक्षयति संस्कारेति॥ संस्कारमात्रजन्यत्वविशि
ष्टज्ञानत्वं स्मृतेर्लक्षणं॥ विशेषणानुपादाने प्रत्यक्षानुभवादावतिव्याप्तिः॥ तद्वारणा
य विशेषणोपादानं॥ संस्कारध्वंसेऽपि संस्कारजन्यत्वस्य सत्त्वात्॥ प्रत्यभिज्ञायामतिव्या
प्तिवारणाय मात्रपदं॥ अनुभवं लक्षयति॥ तद्भिन्नमिति॥ स्मृतिभिन्नत्वविशिष्टज्ञा
नत्वं अनुभवस्य लक्षणं॥ अत्रापि विशेषणानुपादाने स्मृतावतिव्याप्तिः॥ विशेष्या

तत्प्रकारकत्वं यथार्थानुभवस्य लक्षणं ॥ उदाहरणं तु रजते इदं रजतमिति ज्ञानं रजतत्ववद्विशेष्यकत्वे सति

४ नुपादाने घटादौ ऽतिव्याप्तिः ॥ अतः तद्वारणाय उभयोपादानं ॥ अनुभवं विभजते ॥ सद्वि
विध इति ॥ यथार्थानुभवं लक्षयति ॥ तद्वतीति ॥ तद्वतीत्यत्र सप्तम्यर्थः ॥ विशेष्यत्वं ॥
तच्छब्देन ज्ञानप्रकारीभूतो धर्मो विवक्षितः ॥ तथा च तद्वद्विशेष्यकत्वे सति रजतत्वप्रका
रकं ज्ञानं तन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वमिति निष्कर्षः ४
अन्यथा यथाश्रुते रंगरजतयोः इमे रजतरंगे इत्याकारकसमूहालंबनभ्रमे ऽति
व्याप्तिः ॥ तत्रापि रजतत्ववद्विशेष्यकत्वे रंगांशे रजतत्वप्रकारकत्वयोः सत्त्वात् ॥

भाग

रंगत्ववद्विशेष्यकत्वरजतांशे रंगत्वप्रकारयोश्च संभवात् ॥ उक्तनिष्कर्षे तु नातिव्या
प्तिः ॥ रजतांशे रजतत्वप्रकारतायाः रजतत्ववत् रजतविशेष्यतानिरूपितत्वाभावा
त् ॥ रंगांशे रंगत्वप्रकारतायाः रंगत्ववद्विशेष्यतानिरूपितत्वात् ॥ एवं रजतांशे
रंगत्वावगाहित्वेन रंगत्वप्रकारतायाः रजतत्ववद्विशेष्यतानिरूपितत्वाच्चेति ॥
अयथार्थानुभवं लक्षयति ॥ तदभाववतीति ॥ अत्रापि पूर्ववत् तदभाववद्विशे
ष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमिति निष्कर्षः ॥ अन्यथा रंगरजतयोः
किंतु समूहालंबनस्य रंगांशे रजतत्वावगाहित्वेन रजतत्वप्रकारतायाः रंगत्ववद्विशेष्यतानिरूपितत्वात्

११ इमे रंगरजते इति समूहालंबनप्रमायामतिव्याप्तिः । रजतसमूहालंबनस्य रं
गरजतोभयविशेष्यकत्वेन रजतत्वरंगत्वोभयप्रकारकत्वेन रजतत्वाभाव
वद्रंगविशेष्यकत्वरजतत्वप्रकारतयो रंगत्वाभाववद्रजतविशेषकत्व
रंगत्वप्रकारकत्वयोः सत्वात् । निष्कर्षेतु रजतांशे रजतत्वावगाहित्वेन
रंगांशे रंगत्वावगाहित्वेन रजतांशे रजतत्वप्रकारतायाः रजतत्वाभा । ११

ववद्रंगविशेष्यतानिरूपितत्वाभावात् । एवं रंगांशे रंगत्वप्रकारतायाः
रंगत्वाभाववत् । रजतविशेष्यतानिरूपितत्वाभावान्नोक्तिनातिव्याप्तिः
उदाहरणेतु शुक्ताविदं रजतमिति । ॥ ॥

१२ यथार्थानुभवं विभजते ॥ चतुर्विधइति ॥ तत्करणमिति ॥ फलीभूतप्रत्यक्षा

दिकरणं चतुर्विधमित्यर्थः ॥ प्रत्यक्षादिप्रमाणानां प्रमाकरणत्वं ॥ प्रमाणसा

मान्यलक्षणं एकैकप्रमाणलक्षणं तु लक्ष्यते ॥ प्रत्यक्षज्ञानेत्यादिना ॥ करण

लक्षणमाह ॥

॥ ॥ ॥ ॥ असाधारणकारण १२

मिति ॥ व्यापारवदसाधारणकारणं करणमित्यर्थः ॥ असाधारणत्वं च कार्यत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपि

तकारणताशालित्वमित्यर्थः ॥ यथा दंडादीघटादिकं प्रति असाधारणकारणत्वं ॥ कार्यत्वव्याप्यघटत्वादि

रूपधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वं ॥ अतो घटं प्रति दंडो असाधारणकारणं ॥ भ्रमादि

रूपव्यापारवत्वाच्च करणं ॥ साधारणत्वं च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वं ॥ ईश्व

रादृष्टादेः कार्यत्वावच्छिन्नं प्रत्येव कारणत्वात् धोसोरणकारणत्वं ॥ कारणं लक्षयति ॥ कार्यनिय

तेति ॥ कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वं कारणस्य लक्षणं ॥ नियतविशेषणानुपादाने पूर्ववृत्तिनो

१२ रासभादेरपिघटादौकारणत्वंस्यात् ॥ अतो नियतत्वे सतीति विशेषणं देयं ॥ नियतपूर्ववृत्तिनोदंडरूपा
देरपिकारणत्वंस्यात् अतोअनन्यथासिद्धपदमपिकारणत्वलक्षणे निवेशनीयं ॥ दंडरूपादीनां तद
न्यथासिद्धत्वात् ॥ कार्यंलक्षयति ॥ प्रागिति ॥ प्रागभावप्रतियोगित्वंकार्यस्यलक्षणं ॥ कार्योत्पत्तेः पूर्वंइह
घटोभविष्यतीतिप्रतीतिर्जायते ॥ यत्प्रतीतिविषयोयोभावः प्रागभावः तत्प्रतियोगिघटादिकार्यं ॥
कारणंत्रिविधमिति ॥ समवायिकारणंअसमवायिकारणंनिमित्तकारणमितित्रि ॥ समवायिकारणं
लक्षयति ॥ यत्समवेतमिति ॥ यस्मिन्समवेतंसत्समवायसंबंधेनविद्यमानंयत्कार्यमुत्पद्यतेतत्सम १३

वायिकारणमित्यर्थः ॥ उदाहरणंतुतंतवइति ॥ तंतुषुसमवायसंबंधेनविद्यमानंयत्पटात्मकंकार्यमुत्पद्यतेतितंत
वः समवायिकारणमित्यर्थः ॥ सामान्यलक्षणंतुसमवायिकारणस्यलक्षणम् ॥ समवायसंबंधेनघटाधि
नुसमवायसंबंधावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणतातदाश्रयत्वं
समवायिकारणस्यलक्षणम् ॥ समवायसंबंधेनघटाधिकरणेकपालादौकपालादेरेवतादात्म्यसंबंधेने
वसत्वात् ॥ समवायसंबंधावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणता
याः कपालादौसत्वात् लक्षणसमन्वयः ॥ अन्यभावत्वावच्छिन्नप्रतितादात्म्यसंबंधेनद्रव्यस्यहेतुत्वात्

१४ जन्यभावेषुद्रव्यगुणकर्मसुत्रिषुद्रव्यमेवसमवायिकारणंद्रव्येद्रव्यावयवःसमवायिकारणं॥अतोगुणाद्या
वपिद्रव्यस्यैवसमवायिकारणत्वमित्याशयेनाह॥पटस्यस्वगतरूपादेरपीति॥समवायिकारणमि
त्यनुषज्यते॥असमवायिकारणंलक्षयति॥कार्येणेति॥कार्येणसहएकस्मिन्नर्थेसमवेतंसत्कार
णमसमवायिकारणमित्यन्वयः॥कारणेनसहएकस्मिन्नर्थेसमवेतंसत्कारणमसमवायिकारणमि
ण त्यर्थः॥जन्यद्रव्यमात्रेअवयवसंयोगस्यैवासमवायिकारत्वात्॥पटात्मककार्येतदवयवतंतुसंयो
गस्यैवअसमवायिकारणत्वमितिदर्शयति॥यथातंतुसंयोगःपटस्येति॥पटात्मककार्येणस १५

पटात्मककार्येणसहएकस्मिन्नर्थेतंतौसर्वेमेतंसत्समवायसंबंधेनविद्यमानंसत्पटात्मकंकार्यंप्रतितंतुसंयो
गात्मकंकारणमसमवायिकारणमित्यर्थः॥द्वितीयासमवायिकारणंदर्शयति॥कारणेनसहेत्यादिना॥तदु
दाहरति॥तंतुरूपमिति॥कारणेनसहकारणीभूतपटेनसहएकस्मिन्नर्थेतंतुरूपार्थेसमवेतंसत्समवाय
संबंधेनविद्यमानंसत्तंतुरूपंपटरूपंपटरूपंप्रतिकारणंभवति॥अतोअसमवायिकारणंतंतुरूपंपटरूप
स्यसामान्यलक्षणंतुसमवायसंबंधावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितायासमवायस्वसमवायि
समवेतत्वान्यतरसंबंधावच्छिन्नाकपालद्वयसंयोगनिष्ठाकारणताकपालद्वयसंयोगेवर्तते॥एवंअद्यपत

२

१५ नस्पंदनक्रियां च गुरुत्वद्रवत्वे असमवायिकारणे भवतः ।। आद्यपतनक्रियां प्रति अधस्स्पंदनक्रियां प्रति च स
मवायसंबंधेनैव तयोः कारणत्वात् ।। अवयविगुणादौ त्ववयवगुणादेः स्वसमवायिसमवेतत्वसंबंधेनैव
कारणत्वात्तत्संबंधावच्छिन्नकारणताश्रयत्वमवयवगुणादौ वर्तते ।। अवयवगुणभूतकपालतंतुरूपादे
स्वशब्दग्राह्यकपालरूपं तंतुरूपसमवायिकपालतंतुसमवेतत्वसंबंधेन घटपटादौ कपालतंतुरूपयोश्च
सत्वात् ।। तदुभयभिन्नमिति ।। समवाय्यसमवायिभिन्नं कारणमित्यर्थः ।। तदेतदिति ।। यदसाधारण
५६ मिति ।। यदसाधारणमि ।। व्यापारवत्वे सतीत्यपि पूरणीयं ।। अन्यथा तंतुकपालसंयोगयोरतिव्याप्तिः ।। १५

दंडजन्यत्वे सति

तंतुकपालसंयोगयोरपि कार्यत्वव्याप्यघटपटत्वावच्छिन्नं प्रति कारणत्वादसाधारणत्वमस्त्येव ।। अतस्तत्र का
रणत्ववारणाय व्यापारवत्वे सतीति ।। करणलक्षणे विशेषणं देयं ।। व्यापारवत्वं नाम तज्जन्यत्वे सति तज्ज
न्यजनकत्वं भवति हि दंडजन्यघटजनकत्वाभ्रमादेः ।। अतो दंडव्यापारत्वं एवं कपालसंयोगतंतुसंयो
गयोरपि कपालतंतुव्यापारत्वं कपालतंतुसंयोगयोः ।। कपालतंतुसंयोगजन्यत्वे सति तज्जन्यघटप
टजनकत्वात् ।। कारणत्वस्य सत्वात्तत्राव्याप्तिवारणायासाधारणेति ।। षड्विधेंद्रियभूतप्रत्यक्षप्रमा
णस्य लक्षणमाह ।। तत्रेति ।। प्रमाणभूतेषु प्रत्यक्षात्मकं यत् ज्ञानं चाक्षुषादि प्रत्यक्षं तत्प्रति कारणं २

करणलक्षणे असाधारणविशेषणानुपादाने ऽव्याप्तिः इत्यादिः व्यापारवत्वे सति कारणत्वात् ।।

३

व्यापारवदसाधारणं इंद्रियं भवति ॥ अतः प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षलक्षणं ॥ आद्यसन्निकर्षातिरिक्त
१६ चतुर्विधसन्निकर्षाणां समवायघटितत्वेनेंद्रियजन्यत्वाभावात् ॥ व्यापारत्वं न भवति ॥ इंद्रियमनःसंयो
गस्यैव षड्विधप्रत्यक्षे जननीये इंद्रियव्यापारता बोध्या ॥ इंद्रियार्थसंनिकर्षजन्यज्ञानं प्रत्यक्षमित्यत्र ज्ञा
नत्वामात्रोक्तौ स्मृतावतिव्याप्तिः ॥ अतो विशेषणोपादानं ॥ विशेषणमात्रोक्तौ इंद्रियार्थसन्निक
र्षध्वंसे अतिव्याप्तिः ॥ अतो विशेष्योपादानं ॥ ध्वंसं प्रति स्वप्रति स्वप्रतियोगिनः ॥ कारणत्वनियमा
त् ॥ इंद्रियार्थसन्निकर्षध्वंसेपि इंद्रियार्थसन्निकर्षजन्यत्वस्य सत्वात् ॥ प्रत्यक्षप्रमाणमुक्त्वा प्र ८३

ध्वं ध्वं

माणलक्षणमाह ॥ ज्ञानाकरणकमिति ॥ ज्ञानाकरणकं ज्ञानं प्रत्यक्षं तूक्त प्रत्यक्षप्रमाणलक्ष
णं व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानं ॥ तदेव करणं एषां ते ज्ञानकरणकाः ॥ अनुमित्युपमिति
शाब्दाः तद्भिन्नत्वं ॥ प्रत्यक्षे इंद्रियाणामेव करणत्वात् ॥ न तु ज्ञानकरणत्वं ॥ इदं लक्षणं
ईश्वरप्रत्यक्षसाधारणं ॥ ईश्वरीयप्रत्यक्षस्याजन्यत्वात् जन्यप्रत्यक्षस्यैव लक्षणाभि
प्रायेणान्तरमाह ॥ इंद्रियार्थसंनिकर्षेति ॥ जन्यप्रत्यक्षस्यैव लक्षणाभिप्रायेणेदं लक्षणं
॥ प्रत्यक्षं विभजते ॥ निर्विकल्पकमिति ॥ प्रकारताशून्यत्वमेव निर्विकल्पकत्वमित्य

नि

त्वं ॥

१८ समवायस्य हेतुत्वात् ॥ द्रव्यसमवेतसमवेतोष्णत्वशीतत्वादिजातिस्पार्शनप्रत्यक्षे त्वक्सं
युक्तसमवेतसमवायस्य हेतुत्वं एवं अरूपद्रव्यमानसप्रत्यक्षे मनःसंयोगस्य हेतुत्वं आत्म त्वा ॥
समवेतसुखादिमानसप्रत्यक्षे मनःसंयुक्तस[त्वं]मवायस्य हेतुत्वं आत्मसमवेतसमवेत
सुखत्वादिमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायस्य हेतुता ॥ रसनघ्राणयोः रस प्रा
गंधतद्गतजातिग्राहकत्वेन द्वितीयतृतीययोः संनिकर्षयोरेव तत्र हेतुता वाच्या ॥
श्रवणेंद्रियस्य आकाशरूपत्वेन शब्दस्याकाशगुणत्वेन च श्रवणेंद्रियेण च शब्द १८

स्य समवायः सन्निकर्षः शब्द इति शब्दत्वजाति विषयकश्रावणप्रत्यक्षे समवेतस
मवायस्य हेतुता ॥ अभावप्रत्यक्षे विशेषणविशेष्यभावो नाम विशेषणता विशेष्य
तासन्निकर्षः ॥ पंचसंनिकर्षपरि विशेषणता योजनीया ॥ तथाहि द्रव्याधिकर
णकाभावप्रत्यक्षे संयुक्तविशेषणता १ द्रव्यसमवेताधिकरणकाभावस्य प्रत्यक्षे इंद्रिय
संयुक्तसमवेतविशेषणता २ द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे इंद्रिय
संयुक्तसमवेतसमवेतविशेषणता संयोगस्थाने संयुक्तघटपदं दिग्या ॥ समवा

रूपत्वादिकं

१९ यत्स्थाने समवेतपदं पटेत्यादि ॥ अभावरूपे निर्वाह्यं ॥ यथा घटद्रव्यसमवेतपटत्वं
पृथिवीत्वादिकं च तत्तनिलादौ पीतत्वाभावः ॥ घटत्वादिजातौ पटत्वाभावश्च वर्त्तते
॥ सर्व अभावः संयुक्तसमवेतविशेषणतासंन्निकर्षेण गृह्यते ॥ एवं नीलत्वादिजातौ पी
तत्वाभावोपि इंद्रियसंयुक्तसमवेतविशेषणतासन्निकर्षेण गृह्यते ॥ पटसमवेतं नि
लं तत्समवेतं नीलत्वं तद्विशेषणता पीतत्वाभावे वर्त्तते इति संक्षेपः ॥ इति प्रत्यक्षप
रिच्छेदः ॥ अनुमानं लक्षयति ॥ अनुमितीति ॥ अनुमितौ व्याप्तिज्ञानं करणं परा १९

समवेत

मर्शो व्यापारः ॥ अनुमितिः फलं कार्यमित्यर्थः ॥ परामर्शस्य व्याप्तिज्ञानजन्यत्वात् ॥ व्याप्तिज्ञानजन्या
नुमितिजनकत्वाच्च ॥ तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारस्य लक्षणं ॥ उपपन्नं ॥ अनुमि
तिकरणत्वं अनुमानस्य लक्षणं ॥ अनुमानं व्याप्तिज्ञानं एतस्य परामर्शरूपव्यापारद्वारानुमि
तिप्रति असाधारणकारणतया अनुमितिकरणत्वमुपपन्नं ॥ परामर्शजन्यमिति ॥ पराम
र्शजन्यत्वे सतीति सति सप्तम्या वैशिष्ट्यमित्यर्थः ॥ तथा च परामर्शजन्यत्वविशिष्टज्ञा
नत्वमनुमितेर्लक्षणं ॥ तत्र ज्ञानत्वं मात्रोपादाने प्रत्यक्षादावतिव्याप्तिः ॥ अतस्तद्वा

२० रणायपरामर्शजन्यत्वे सतीति विशेषणोपादानं विशेषमात्रोक्तौ परामर्शध्वंसे अतिव्याप्तिः
अतो ज्ञानत्वमात्रोपादानं ॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ॥ व्याप्तिविशिष्टं च तत्
पक्षधर्मताज्ञानं चेति ॥ कर्मधारयाद्विशिष्टपदस्य प्रकारकपरत्वात् पक्षधर्मताज्ञानमित्य
त्र षष्ट्या विषयत्वबोधनात् पक्षधर्मतापदस्य पक्षसंबंधार्थकत्वाच्च ॥ कर्मधारयस
मासे समस्यमानपदार्थयोरभेदात् ॥ संसर्गकाभेनव्याप्तिप्रकारकाभिन्नयत्पक्षसंबं
धविषयकं तत्परामर्शपदेनोच्यते ॥ एवं सति धूमो वह्निव्याप्यः घटवान्पर्वत इति २०

समूहालंबने परामर्शलक्षणं गतं ॥ अतः तद्वारणाय पक्षतानिष्ठविशेष्यतानिरूपिताया
हेतुनिष्ठप्रकारतातन्निरूपिता व्याप्तिनिष्ठप्रकारता तच्छालिज्ञानं परामर्श इति निष्क
र्षः ॥ एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वमनुमितिलक्षणं ॥ अनुमितिपरामर्शयोः
विशिष्य कार्यकारणभावस्त्वेत्थं पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसंबंधा
वच्छिन्नवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति वह्निव्याप्तिप्रकार
तानिरूपिता या धूमत्वावच्छिन्नप्रकारतातन्निरूपिताया पर्वतत्वावच्छिन्नविशे

२१ व्याप्तात्तज्ञानाल्लिनिर्णयः कारणमिति ।। सत्त्वनिर्णयः वन्हिव्याप्यधूमवान्पर्वत इत्याकारकः
।। यत्रेति ।। यत्रपदेनैव सावशाधूमाधिकरणे कोयावती वन्हिमत्त्वलाभात् ।। यस्यदम
हिस्राधूमव्यापकत्वं लब्धं ।। साहचर्यं सामानाधिकरण्यं ।। तथा च धूमव्यापकं वन्हि
सामानाधिकरण्यं व्याप्तिरित्यर्थः ।। अत्र धूमव्यापकत्वं वन्हौ किन्नाम धूमसमानाधि
करणात्यंताभावप्रतियोगितानवच्छेदकधर्मत्वं ।। तादृशधर्मो वन्हित्वं ।। तथा हि ।। धू
माधिकरणपर्वतमहानसचत्वरादौ वर्त्तमानो योभावः घटत्वावच्छिन्नप्रतियोगि २१

ताकाभावः ।। नतु वन्हित्वावच्छिन्नप्रतियोगिताकोभावः ।। कुतः पर्वतादौ वन्हेः सत्त्वात्
एवसति धूमाधिकरणपर्वतचत्वरादौ वर्त्तमानावच्छेदकं घटत्वं ।। अनवच्छेदकं वन्हित्वं ता
दृशोवन्हित्वं वन्हौ वर्त्तते ।। अतो धूमव्यापकत्वं वन्हौ वर्त्तत इति ।। इयमन्वयव्याप्तिः ।।
सिद्धान्तानुसारेण ।। पूर्वपक्षीयव्याप्तिस्तु साध्याभाववदवृत्तित्वं ।। साध्यतावच्छे
दकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकसंबंधावच्छि
न्नप्रतियोगितावच्छेदकावच्छिन्नत्वेनावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदका

२२ वच्छिन्नं यद्वृत्तित्वं तादृशवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावो व्याप्तिः ॥ तच्चके
वलान्वयिन्यव्याप्तमिति सिद्धान्तानुमितिसाधारणं द्रष्टव्यं ॥ स्वार्थानुमानं नाम न्याया
प्रयोज्यानुमानं ॥ न्यायप्रयोज्यानुमानं परार्थानुमानं ॥ न्यायत्वं च प्रतिज्ञादिपंचक
समुदायकत्वं ॥ अवयवत्वं प्रतिज्ञाद्यन्यतमत्वं ॥ अन्वयेनेति ॥ व्यापकसामाना
धिकरण्यरूपव्याप्तिमानित्यर्थः ॥ व्यतिरेकेणेति ॥ व्यतिरेको नामाभावः ॥ तथा च
साध्याभावहेत्वभावयोर्व्याप्तिः व्यतिरेकव्याप्तिः ॥ यथा यत्र यत्र वन्ह्यभाव २२

स्तत्र तत्र धूमाभाव इति यत्र पदवीप्सा वन्ह्यभाववती यावंति धूमाभावग्रहणे यावत्सत्त्वस्य व्यापक
परतया धूमाभावे वन्ह्यभावव्यापकत्वं लब्धं ॥ वन्ह्यभावनिष्ठा व्याप्तिः स्वाश्रयीभूतवन्ह्य
भावव्यापकीभूताभावप्रतियोगितासंबंधेन धूमनिष्ठतया गृहीतव्यतिरेकव्याप्तिमत्त्वेन व्यति
रेकित्वेन धूमव्यापकवन्हिसामानाधिकरण्यरूपान्वयव्याप्तिमत्त्वेन अन्वयित्वेन गीयते ॥
व्यतिरेकपरामर्शस्तु वन्ह्यभावव्यापकीभूताभावप्रतियोगिधूमवानयं पर्वत इत्याकारकः
व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं ॥ केवलान्वयित्वं ॥ साध्ये केवलान्वयित्वं

23 अभावप्रतियोगित्वं ॥ तथा चाभावाप्रतियोगीसाध्यकत्वं । केवलान्वयिहेतोर्लक्षणं ॥ एतल्ल
क्षणे हेतोः साध्यव्यतिरेकशून्यत्वे सतीति संगच्छते ॥ साध्यस्य केवलान्वयित्वाद्व्यतिरेकव्या
प्त्यसंभवादन्वयमात्रव्याप्तिकं केवलान्वयि इति मूलकारोक्तलक्षणमुपपन्नं ॥ अत्यंताभावा
प्रतियोगित्वं केवलान्वयित्वं ॥ न चैवं संयोगाभावे कालाभावे चाव्याप्तिरिति वाच्यं ॥ स्वविरो
धिवृत्तिमदत्यंताभावाप्रतियोगित्वमित्यर्थत्वात् ॥ एवं विजातीयसंबंधेन सर्वत्र विद्यमानत्वं ॥
केवलान्वयीति तन्नव्याः ॥ अन्वयव्याप्तिशून्यत्वे सति केवलव्यतिरेकित्वं ॥ यथा पृथिवीति 23

अत्र पृथिवीत्वावच्छिन्नं पक्षः ॥ पृथिवीतरजलाद्यष्टभेदः ॥ साध्यं ॥ गंधवत्त्वं हेतुः ॥ अत्र
यद्गंधवत्तदितरभेदवदिति ॥ अन्वयदृष्टांताभावात् गंधव्यापकेतरभेदसामानाधिकरण्य
रूपान्वयव्याप्तिग्रहासंभवात् ॥ किंतु यत्र यत्रेतरभेदाभावः तत्र तत्र गंधाभावः ॥ ५ ॥
यथा जलादिकमिति व्यतिरेकदृष्टांतमीभूतजलादावितरभेदाभावरूपसाध्याभावव्याप
कता गंधाभावे दृश्यते ॥ इममेवार्थं मनसि निधाय यन्नेतरेभ्यो भिद्यते न तद्गंधवदिति
॥ यथा जलमिति ग्रंथे मूलकारो व्यापकगंधाभावेनोक्ता व्यतिरेकव्याप्तिमेव प्रदर्शित

२४ वान् ॥ एवं व्यतिरेकव्याप्तिग्रहानंतरं इतरभेदाभावव्यापकीभूताभावप्रतियोगिगंधवती पृथि
वीत्याकारकव्यतिरेकपरामर्शात् ॥ पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्न
विधेयताकपृथिवी इतरभेदवतीत्याकारकानुमितिर्जायते ॥ इति तत्त्वं ॥ यथा मूलार्थस्तु यथा
जलमिति जलभिन्नेतरभेदाभाववदिति न चेयं तथेति ॥ इतरभेदाभावव्यापकगंधाभाववती
न किंतु तदभावाभाववति गंधवतीत्यर्थः तस्मान्न तथेति ॥ तच्छब्देन गंधाभावाभावरू
पस्य परामर्शो न तस्मादिति ॥ पंचम्यंताद् गंधाभावभावाद्गंधवत्त्वादित्यर्थोपलब्धेः ॥ ते २४

भावा पक्षत्वं

थेतरभेदाभावव्यापकगंधाभाववती नैभाव इत्यस्याभावः ॥ तथा च इतरभेदाभावाभाववती इतर
भेदवतीत्यर्थः ॥ संदिग्धसाध्येति ॥ साध्यप्रकारकसंदेहविशेष्यत्वं ॥ अनुमितेः पूर्वं साध्यसंदेहो
य नियमेन जायत इति अभिप्रायेणेदं लक्षणं प्राचीनैरुक्तं ॥ गगनविशेष्यकमेघप्रकारकसंदेहा
भावदशायामपि गृहमध्यस्थस्य पुरुषस्य घनगर्जितश्रवणेन गगनं मेघवदित्याकारकानुमिति
र्जायते ॥ गगनत्वावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकानुमितेर्दर्शनात्
॥ प्राचीनमतं विहाय नवीनैः अनुमित्युद्देश्यत्वं पक्षत्वं स्वीकृतं ॥ निश्चितसाध्येति साध्यप्र

२५ कारकनिश्चयविशेष्यत्वं सपक्षत्वनिश्चिनेति ॥ साध्याभावप्रकारकनिश्चयविशेष्यत्वं विप
क्षत्वं ॥ निश्चयः वन्हिभाववानित्याकारकः ॥ एवं सद्धेतुत्वं निरूप्य हेत्वाभासान् निरूपयति ॥
सव्यभिचारेति हेतुवदाभासमाना इति हेत्वाभासाः ॥ दुष्टहेतवः दोषाश्च सव्यभिचारविरुद्ध
सत्प्रतिपक्षासिद्धबाधिताः ॥ एतद्विशिष्टाः दुष्टहेतव इत्यर्थः ॥ हेतोर्दोषज्ञाने सत्यनु
मितिप्रतिबंधो जायते ॥ व्याप्तिज्ञानप्रतिबंधो वा जायते ॥ अतो वादिनिग्रहार्थं वादिनो
द्भावितहेतोर्दोषोद्भावनार्थं दुष्टहेतुनिरूपणमित्यर्थः ॥ पर्वतो वन्हिमान् प्रमेयत्वा २५

द्दित्यादौ प्रमेयत्वहेतौ वन्ह्यभाववद्वृत्तित्वरूपव्यभिचारे ज्ञाते वन्ह्यभाववत् ॥ वृत्ति
त्वरूपव्याप्तिग्रहप्रतिबंधः फलं ॥ असाधारणइति सर्वसपक्षविपक्षव्यावृत्तत्वं नि
श्चितसाध्याभाववद्वृत्तित्वं च साध्यासमानाधिकरण्यं हेतौ साध्यासमानाधिक
रण्ये निश्चिते साध्यसमानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबंधः फलं ॥ अनुपसंहा
रिणं लक्षयति सर्वव्याप्तिमिति ॥ उभयत्र दृष्टांताभावादन्वयव्याप्तिज्ञानव्यतिरेक का
साध्याभाववद्वृत्तित्वं ज्ञानोभयसामग्री नास्तीत्यर्थः पक्षातिरिक्ताप्रसिद्धेरिति

२६ भाव:॥ विरुद्धं लक्षयति॥ साध्याभावव्याप्य इति॥ तथा च साध्याभावव्याप्यहेतुप्रका
रकज्ञानम्॥ पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबंध: फलं॥ एवं सत्प्रतिपक्षेपि
विरुद्धसत्प्रतिपक्षयोर्विशेषस्तु विरुद्धहेतोरेकत्वेन सत्प्रतिपक्षहेतोर्द्वित्वेन च ज्ञातव्य:॥ सत्प्रति
पक्षे द्वौ हेतू विरुद्धस्तु: एक हेतुरिति या चेत्॥ सत्प्रतिपक्षं लक्षयति यस्येति॥ साध्याभावसा
धकहेतु: साधनत्वेन उपन्यस्तं इत्यसामर्थ्यं स एव नमिति भवति॥ असिद्धं लः॥ आश्रयासि
द्धिरिति पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धि:॥ यथा गगनीयत्वविशिष्टपक्षाप्रसि २६

द्धे:॥ सौरभ्यानुमितिर्न संभवति॥ स्वरूपासिद्धिर्नाम पक्षे हेत्वभाव: तथा च हेत्वभावविशिष्ट
पक्षज्ञानात् पक्षविशेष्यकहेतुप्रकारकपरामर्शप्रतिबंध: फलं॥ व्याप्यत्वासिद्ध इति॥ प्रकृ
ते धूमव्यापकत्वं आर्द्रेंधने गृहीतं चेत्॥ धूमे आर्द्रेंधनव्याप्यत्वं गृहीतं एवं वह्निव्यापकत्व
आर्द्रेंधने गृहीतं चेत्॥ वन्हौ तद्व्याप्यत्वं गृहीतं तदेव व्यभिचारित्वं॥ तथा च उपाधे: व्य
भिचारित्वं साधने गृहीतं चेत्॥ उपाधिभूतार्द्रेंधनसंयोगव्याप्यधूमव्यभिचारित्वं
गृहीतमेव॥ अनुमानप्रकारकश्चापुनर्नुमाने हेतुपक्षीकृत्य वन्हि: धूमव्यभिचारी धू

२८ मव्यापकआर्द्रेंधनव्यभिचारात्॥ घटत्वादिवत्॥ योयः साध्यव्यापकव्यभिचारी स साध्य
व्यभिचारी॥ एवंप्रकारेणप्रकृतस्यानुमानेहेतुभूतपक्षेसाध्यव्यभिचारित्वाव्यापकतयादूषक व्या
त्वमुपाधेः फलं॥ तथाचधूमाभाववद्वृत्तित्वरूपधूमव्यभिचारेग्राहितेवन्हौधूमाभाव
दवृत्तित्वरूपव्याप्तिग्रहप्रतिबंधः फलं॥ यस्येति॥ यस्यहेतोः साध्याभावःसत्प्र
माणांतरेणनिश्चितः तथाचप्रत्यक्षीकसाध्याभावनिश्चयेसाध्यानुमितिप्रतिबं
धः फलं॥ बाधितसाध्यकत्वात्हेतोःहेतुरपिबाधितहेतुरुच्यते॥ इत्यनुमानंसमाप्तं॥ २८

॥६९॥ उपमानंलक्षयति॥ संज्ञासंज्ञिति संज्ञापदंसंज्ञीपदार्थः॥ तयोः संबंधःशक्तीः
॥ तथाचपदपदार्थसंबंधज्ञानंउपमितिरित्यर्थः॥ उपमानमितिअतिदेशवाक्यार्थज्ञा
नं॥ अतिदेशवाक्यार्थस्मरणंव्यापारः॥ गोसदृशोगवयपदवाच्यइत्साकारकात्गोस
दृशत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकंज्ञानंजायतेतदेवकारणंइत्युपमा
नं॥ आप्तेति॥ पदज्ञानंकरणं॥ वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिर्व्यापा
रः॥ वाक्यार्थज्ञानंफलंतच्छाब्दबोधः॥ वृत्तिर्नामशक्तिलक्षणान्यतररूपा॥ श स्य

२८ कीनीमघटादिविशेष्यकघटादिपदजन्यबोधविषयत्वप्रकारकईश्वरसंकेतः ॥ ईश्व
रसंकेतनामईश्वरेच्छासैवशक्तिरित्यर्थः ॥ शक्तिनिरूपकत्वमेवपदेशक्तिविषयतायाःसंबं
धेनशक्याश्रयत्वंशक्यत्वं ॥ शक्यसंबंधोलक्षणासाद्विविधा ॥ गौणीशुध्धाचेति
॥ गौणीनामसादृश्यविशिष्टलक्षणा ॥ यथासिंहोयंमाणवकइत्यादौसिंहपद
स्यसिंहसादृश्यविशिष्टलक्षणा ॥ शुध्धापिद्विविधा ॥ जहल्लक्षणाअजहल्लक्षणाचे
ति ॥ लक्ष्यतावच्छेदकरूपेणलक्ष्यमात्रबोधिका ॥ जहल्लक्षणा ॥ गंगायांघोषइत्यत्र २८

गंगापदशक्यप्रवाहसंबंधस्यतीरेसत्वात् ॥ तादृशशक्यसंबंधरूपलक्षणावत्वाद्गंगापदात्तीरोप
स्थितिः ॥ लक्ष्यतावच्छेदकरूपेणलक्ष्यशक्योभयसंबंधप्रयोजिका ॥ अजहल्लक्षणा ॥ यथाका
केभ्योदधिरक्ष्यतांइत्यादिकाकपदस्यदध्युपघातकेलक्षणा ॥ लक्ष्यतावच्छेदकंदध्युपघातक
॥ त्वंतेनरूपेणदध्युपघातकानांकाकबिडालकुक्कुटसारमेयादीनांशक्यलक्ष्याणांसर्वेषांचबो
८ धोजात ॥ जहदजहल्लक्षणाचेदांतीनांमते ॥ आकांक्षाचेतिअव्यवहितोत्तरत्वसंबंधेन
यत्पदेनयत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तोयादृशशाब्द ॥ बोधाभावः तादृशशाब्दे

अभिलाषितवृत्ती प्रवर्तककरणत्वस्य ... धर्मस्य वह्नौ बाधनिश्चयाद्न तादृशवाक्यात् शाब्दबोधः संभवति ॥ तन्निषिद्धं निरु॰

२९ तत्सदेतत्सदृत्तमाकांक्षा तादृशाकांक्षाज्ञाने शाब्दबोधे कारणं ॥ अर्थाबाधार्थः ॥ इति ॥ अर्थबाधाभा
वो योग्यता तेन्द्वबोधो न संभवति ॥ आसत्तीं निरूपयति ॥ पदानामिति ॥ पदानामसद्योच्चारीता निअ
धे॰रा विलंबेनोच्चारितत्वं इत्यर्थः ॥ इदमुपलक्षणं ॥ वेदमूलकस्मृत्यादिन्यग्राह्यार्थानि ॥ लौकि
त्तानि कमिति आप्तत्वं वैदिकसंप्रयोगहेतुभूतप्रत्ययार्थज्ञानवर्त्तयथार्थानुभवं निरूप्य ॥ अयथार्था
नुभवं निरूपयति ॥ संशयेत्यादिना ॥ एकेति ॥ विरुद्धनानाधर्मावच्छिन्नविशेष्यता निरू
पितभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः ॥ विपर्ययो नाम भ्रम इत्यर्थः ॥ व्यापारो पि ति
॥ तर्के व्याप्यस्य व्यापकस्य च व्यतिरेकनिश्चयः कारणं ॥ अन्यथा बाधनिश्चयाभावेऽप्येष्टा २९

पत्तिदोषेण तर्कानुसृतेः ॥ ७९ ॥ सुखं निरूपयति ॥ अनुकूलेति ॥ इतरेच्छाअनधीनेच्छावि
नीयत्वस्य वेदनीयविषयत्वस्य घटेनुकूलत्वरव्या
षयत्वमिति निष्कर्षः ॥ यथा भूलेअनुकूलत्वप्रकारक वेद[illegible]कारज्ञानदशायां अनुकूल
त्वप्रकारकज्ञानविशेष्यत्वस्य घटादावपि सत्त्वात् ॥ घटादावतिव्याप्तिरिति निष्कृष्टमुक्तं ॥
भोजनादावतीव्याप्तिवारणाय इतरेच्छाअनधीने ति इच्छाविशेषणं ॥ सुखेच्छायाः सुखत्व
प्रकारकज्ञानमात्रजन्यत्वात् ॥ दुःखं निरूपयति ॥ प्रतीकूलेति ॥ अत्रापि इतरद्वेषानधी
नद्वेषविषयत्वमिति निष्कृष्टलक्षणं ॥ द्वेषविषयत्वमात्रोक्तौ सर्पादावपि द्वेषविषय

स्य

३० त्वसत्वात् ॥ अत्र अतिव्याप्तिवारणाय इतरद्वेषानधीनेति द्वेषविशेषणं ॥ सर्पजन्यदुःखादौ द्वे
षात् सर्वोपि द्वेष इति सर्पद्वेषस्य सर्पजन्यदुःखद्वेषजन्यद्वेषत्वात् ॥ अन्यद्वेषानधीनद्वेषविषय
त्वरूपदुःखलक्षणस्य सर्पादौ असत्वान्नातिव्याप्तिः ॥ फलेच्छा उपायेच्छां प्रति कारणं अतः
फलेच्छानाशादुपायेच्छा भवति ॥ एवं फलद्वेषात् उपायद्वेषः ॥ धर्माधर्मौ निरूपयति ॥
विहितेति ॥ वेदविहितेत्यर्थः ॥ निषिद्धेति ॥ वेदनिषिद्धेत्यर्थः ॥ सामान्यं निरूपयति
नित्यमेकमनेकमिति ॥ नित्यत्वे सत्यनेकसमवेतत्वं जातेर्लक्षणं ॥ नित्यत्वविशेषणानुपादा ३०

नेऽनेकसमवेतत्वमात्रोपादाने संख्यादावतिव्याप्तिः ॥ तत्रापि अनेकद्रव्यसमवेतत्वस्य सत्वा
त् तद्वारणाय नित्यत्वोपादानं ॥ अनेकसमवेतत्वानुपादाने नित्यत्वमात्रोपादाने आकाशादावति
वे व्याप्तिः ॥ तद्वारणाय ॥ अनेकसमवेतत्वं विशेषणं ॥ अनेकसमवेतत्वानुपादाने नित्यत्ववि
ये शिष्टसमवेतत्वमात्रोक्तौ आकाशगतैकत्वपरिमाणादौ जलपरमाणुगतरूपादौ अतिव्या
प्तिः ॥ जलपरमाणुगतरूपादेः आकाशगतैकत्वपरिमाणादेः नित्यत्वात् समवेतत्वाच्च
॥ अतः अनेक इति समवेतं विशेषणं ॥ इति शब्दपरिच्छेदः ॥ ५ ॥ समाप्तः ॥ ५ ॥ कारक

३१ तमपराधं क्षंतुमर्हतिसंतः॥शुभंभवतु॥इतितर्कसंग्रहटिकान्यायबोधिनीसमाप्ता॥ ७

॥ ॥श्रीरामचंद्रार्प्पणमस्तु॥श्रीहनुमंतार्प्पणमस्तु॥ ॥ ॥ ॥

574